संस्कृत

क्र.न.५२

पुराण

3827

ब्रह्मोत्तरखंड

४१० पृ. / 36

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥ अथ ब्रह्मोत्तरखंडप्रारंभः ॥ श्री ॥

A joint project of the Rajawade Sanshodhan Mandal, Dhule & Yashwantrao Chavan Pratishthan, Mumbai

(2)



Rajwade Sanshodhan Mandal, Dhule and

(2A)

श्रीगणेशायनमः॥ ॥श्रीमदार्यादुर्गायैनमः॥ ॥श्रीभवानीशंकराभ्यांनमः॥ ॥ज्यो
तिर्मात्रस्वरूपायनिर्मलज्ञानचक्षुषे॥नमःशिवायशांतायब्रह्मणेलिंगमूर्त्तये॥१॥-
ऋषयऊचुः॥ आख्यातंभवतासूतविष्णोर्माहात्म्यमुत्तमं॥समस्ताघहरंपुण्यंसमा
सेनश्रुतंचनः॥२॥इदानींश्रोतुमिच्छामोमाहात्म्यंत्रिपुरद्विषः॥तद्भक्तानांचमाहात्म्यम-
शेषाघहरंपरं॥३॥तन्मंत्राणांचमाहात्म्यंतथैवद्विजसत्तम॥तत्कथायाश्चतद्भक्तेःप्रभा
वमनुवर्णय॥४॥ सूतउवाच एतावदेवमर्त्यानांपरंश्रेयःसनातनं॥यदीश्वर-
कथायांवैजाताभक्तिरहैतुकी॥५॥अतस्तद्भक्तिलेशस्यमाहात्म्यंवर्ण्यतेमया॥अपि-
कल्पायुषानालंवक्तुंविस्तरतःक्वचित्॥६॥सर्वेषामपिपुण्यानांसर्वेषांश्रेयसामपि॥
सर्वेषामपियज्ञानांजपयज्ञःपरःस्मृतः॥७॥तत्रादौजपयज्ञस्यफलंस्वस्त्ययनंमहत्॥
शैवंषडक्षरंदिव्यंमंत्रमाहुर्महर्षयः॥८॥देवानांपरमोदेवोयथावैत्रिपुरांतकः॥मंत्राणां
परमोमंत्रस्तथासोयंषडक्षरः॥९॥एषपंचाक्षरोमंत्रोजन्मृणांमुक्तिदायकः॥संसेव्यतेमु
निश्रेष्ठैरशेषैःसिद्धिकांक्षिभिः॥अस्यैवाक्षरमाहात्म्यंनालंवक्तुंचतुर्मुखः॥श्रुतयोयत्र-
सिद्धांतंगताःपरमनिर्वृताः॥सर्वज्ञःपरिपूर्णश्चसच्चिदानंदलक्षणः॥सशिवोयत्ररमते

शैवेपंचाक्षरेशुभे ॥ १२ ॥ एतेनमंत्रराजेनसर्वोपनिषदात्मना ॥ लेभिरेमुनयः सर्वेपरंब्रह्म
निरामयं ॥ १३ ॥ नमस्कारेणाजीवत्वंशिवेत्रपरमात्मनि ॥ यइत्यैक्यंगतोमंत्रः परब्रह्ममयो
ह्यसौ ॥ १४ ॥ भवपाशनिबद्धानांदेहिनांहितकाम्यया ॥ ॐ नमः शिवायेतिमंत्रमाद्यंशि
वःस्वयं ॥ १५ ॥ किंतस्यबहुभिर्मंत्रैः किंतीर्थैः किंतपोध्वरैः ॥ यस्योंनमः शिवायेतिमंत्रो
हृदयगोचरः ॥ १६ ॥ तावद्भ्रमंतिसंसारेदारुणेदुःखसंकुले ॥ यावन्नोच्चारयंतीमंमंत्रं
देहभृतः सकृत् ॥ १७ ॥ मंत्राधिराजराजोयंसर्ववेदांतशेखरः ॥ सर्वज्ञाननिधानंचसो
यंचैवषडक्षरः ॥ १८ ॥ कैवल्यमार्गदीपोयमविद्यासिंधुवाडवः ॥ महापातकदावा-
ग्निः सोयंमंत्रः षडक्षरः ॥ १९ ॥ स्त्रीभिः शूद्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः ॥ ना-
स्यदीक्षानहोमश्चनसंस्कारोनतर्पणं ॥ २० ॥ नकालोनोपदेशाश्चसर्वः शुचिरयंमनुः
॥ महापातकविच्छित्त्यैशिवइत्यक्षरद्वयं ॥ २१ ॥ अलंनमस्क्रियायुक्तोमुक्तयेपरिक-
ल्पते ॥ उपदिष्टः सद्गुरुणाजप्तः क्षेत्रेचपावने ॥ २२ ॥ सद्योयथेप्सितांसिद्धिंददातीति
किमद्भुतं ॥ सद्गुरुंहिसमाश्रित्यग्राह्योयंमंत्रनायकः ॥ २३ ॥ पुण्यक्षेत्रेषुजप्तव्यः स
द्यः सिद्धिंप्रयच्छति ॥ गुरवोनिर्मलाः शांताः साधवोमितभाषिणः ॥ २४ ॥ कामक्रोध

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

विनिर्मुक्ताःसदाचाराजितेंद्रियाः॥एतैःकारुण्यतोदत्तोमंत्रःक्षिप्रंप्रसिध्यति
॥२५॥क्षेत्राणिजपयोग्यानिसमासात्कथयाम्यहं॥प्रयागंपुष्करंरम्यंकेदारंसेतुबं-
धनं॥२६॥गोकर्णंनैमिषारण्यंसद्यःसिद्धिकरंनृणां॥अत्रानुवर्ण्यतेसद्भिरितिहासःपु
रातनः॥२७॥असकृद्वासकृद्वापिश्रृण्वतांमंगलप्रदः॥मथुरायांयदुश्रेष्ठोदाशार्हइ-
तिविश्रुतः॥२८॥बभूवराजामतिमान्महोत्साहोमहाबलः॥शास्त्रज्ञोनयवाक्शूरो-
धैर्यवानमितद्युतिः॥२९॥अप्रधृष्यःसुगंभीरोसंग्रामेष्वनिवर्त्तितः॥महारथोमहेष्वासो
नानाशास्त्रार्थकोविदः॥३०॥वदान्योरूपसंपन्नोयुवलक्षणसंयुतः॥सकाशीराजत
नयामुपयेमेवराननां॥३१॥कांतांकलावतींनामरूपशीलगुणान्वितां॥कृतोद्वाहःसरा-
जेंद्रःसंप्राप्यनिजमंदिरं॥३२॥रात्रौतांशयनारूढांसंगमायतदाव्हयत्॥सास्वभ
र्त्रासमाहूताबहुशःप्रार्थितासति॥३३॥नबबंधमनस्तस्मिन्नचागच्छत्तदंतिकं॥संग
माययदाहूतानागतानिजवल्लभा॥३४॥बलादाहर्त्तुकामस्तामुदतिष्ठन्महीपतिः॥
मामास्पृशमहाराजकारणज्ञांव्रतेस्थितां॥३५॥धर्माधर्मौविजानासिमाकर्षीःसाहसं
मयि॥क्वचित्प्रियेणयुक्तंयद्रोचतेतुमनीषिणां॥३६॥दंपत्योःप्रीतियोगेनसंगमः-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

प्रीतिवर्द्धनः॥प्रियंयदामेजायेततदासंगस्तुतेमयि॥काप्रीतिःकिंसुखंपुंसांबलाद्भो
गेनयोषितां॥अप्रीतांरोगिणींनारीमंतर्वत्नींधृतव्रतां॥३८॥रजस्वलामकामांचन
कामेतबलात्पुमान्॥प्रीणनंलालनंपोषंरंजनंमार्दवंदयां॥३९॥कृत्वावधूमुपगमेद्यु
वतींप्रेमवान्पतिः॥युवतौकुसुमेचैवविधेयंसुखमिच्छता॥४०॥इत्युक्तोपितया
साध्व्यासराजास्मरविह्वलः॥बलादाकृष्यतांहस्तेपरिरेभेरिरंसया॥४१॥तांस्पृ
ष्टमात्रांसहसातप्तायःपिंडसन्निभां॥निर्दहंतीमिवात्मानंतत्याजभयविह्वलः॥
४२॥ राजोवाच अहोसुमहदाश्चर्यमिदंदृष्टंतवप्रिये॥कथमग्निसमंजातंवपुः
पल्लवकोमलं॥४३॥इत्थंसुविस्मितोराजाभीतासाराजवल्लभा॥प्रत्युवाचविह-
स्यैनंविनयेनशुचिस्मिता॥४४॥ राज्ञ्युवाच राजन्ममपुराबाल्येदुर्वाससामुनि
पुंगवः॥शैवींपंचाक्षरींविद्यांकारुण्येनोपदिष्टवान्॥४५॥तेनमंत्रानुभावेनममांगंक
लुषोज्झितं॥स्प्रष्टुंनशक्यतेपुंभिःसपापैर्दैववर्जितैः॥४६॥त्वयाराजप्रकृतिना-
कुलटागणिकादयः॥मदिरास्वादनिरतानिषेव्यंतेसदास्त्रियः॥४७॥नस्नानंक्रि- २
यतेनित्यंनमंत्रोजाप्यतेशुचिः॥नाराध्यतेत्वयेशानःकथंमांस्प्रष्टुमर्हसि॥४८॥ रा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

जोवाच तांसमाख्याहि कृश्रोणिशैवींपंचाक्षरींशुभां ॥ विद्याविध्वस्तपापोहंत्व-
यीछामिरतिंप्रिये ॥ ४९ ॥ राज्ञ्युवाच नाहंतवोपदेशंवैकुर्यांममगुरुर्भवान् ॥ उ
पातिष्ठगुरुंराजन्गर्गंमंत्रविदांवरं ॥ ५० ॥ सूतउवाच इतिसंभाष्यमाणौतौ
दंपतीगर्गसन्निधिं ॥ प्राप्यतच्चरणौमूर्ध्नावंवदातेकृतांजली ॥ ५१ ॥ अथराजागुरुं-
प्रीतमभिपूज्यपुनःपुनः ॥ समाचष्टविनीतात्मारहस्यात्ममनोरथं ॥ ५२ ॥ राजो
वाच कृतार्थंमांकुरुगुरोसंप्राप्तंकरुणानिधीः ॥ शैवींपंचाक्षरींविद्यामुपदेष्टुंत्व
मर्हसि ॥ ५३ ॥ अनाज्ञातंयदाज्ञातंयत्कृतंराजकर्मणा ॥ तत्पापंयेनशुध्येततन्मं
त्रंदेहिमेगुरो ॥ ५४ ॥ एवमभ्यर्थितोराज्ञागर्गोब्राह्मणपुंगवः ॥ तौनिनायमहापु-
ण्यंकालिंद्यास्तटमुत्तमं ॥ ५५ ॥ तत्रपुण्यतरोर्मूलेनिषण्णोथगुरुस्स्वयं ॥ पुण्य
तीर्थजलेस्नातंराजानंसमुपोषितं ॥ ५६ ॥ प्राङ्मुखंचोप वेश्याथनत्वाशिवपदां
बुजं ॥ तन्मस्तकेकरंन्यस्यददौमंत्रंशिवात्मकं ॥ ५७ ॥ तन्मंत्रधारणादेवतन्मुनेर्ह
स्तसंगमात् ॥ निर्ययुस्तस्यवपुषोवायसाःशतकोटयः ॥ ५८ ॥ तेदग्धपक्षाःक्रोशं-
तोनिपतंतोमहीतले ॥ भस्मीभूतास्ततःसर्वेदृश्यंतेस्मसहस्रशः ॥ ५९ ॥ दृष्ट्वानद्भा

Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan

(5)

यसकुलंदत्यमानंस्म विस्मितौ॥राजाचराजमहिषीतंगुरुंपर्यपृछतां॥६०॥ गुरुरुवाच
राजन्भवसहस्रेषुभवतापरिधावता॥संचितानिदुरंतानिसंतिपापान्यनेकशः॥६१॥ ते
षुजन्मसहस्रेषुयानिपुण्यानिसंतिते॥तेषामाधिक्यतः क्कापिजायतेपुण्ययोनिषु॥६२॥
तथापापीयसींयोनिंक्कचित्पापेनगछति॥साम्येपुण्यान्ययोश्चैवमानुषींयोनिमाप्तवान्
॥६३॥शैवीपंचाक्षरीविद्यायदातेह्रदयंगता॥अघानांकोटयस्त्वत्तः काकरूपेणनिर्ग-
ताः॥६४॥कोटयोब्रह्महत्यानामगम्यागम्यकोटयः॥भवकोटिसहस्रेषुयेन्येपातकरा
शयः॥६५॥क्षणाद्भस्मीभवंत्येवशैवेपंचाक्षरेधृते॥आसंस्तवाघराजेंद्रदग्धाःपातक-
कोटयः॥६६॥अनयासहपूतात्माविहरस्वयथासुखं॥इत्याभाष्यमुनिश्रेष्ठस्तंमंत्रमुप-
दिश्यच॥६७॥ताभ्यांविस्मितचित्ताभ्यांसहितःस्वगृहंययौ॥गुरुवर्यमनुज्ञाप्यमुदितौ
तौचदंपती॥६८॥ततःस्वभवनंप्राप्यरेजतुस्सुमहाद्युती॥राजाहृष्टःसमाश्लिष्यपत्नींचंद
नशीतलां॥६९॥संतोषंपरमंलेभेनिस्वःप्राप्ययथाधनं॥अशेषवेदोपनिषत्पुराणशास्त्रावतं
सोयमघांतकारी॥पंचाक्षरस्यैवमहाप्रभावोमयासमासात्कथितोवरिष्ठः॥७०॥ इतिश्रीस्कं
दपुराणेब्रह्मोत्तरखंडेपंचाक्षरवर्णननामप्रथमोऽध्यायः॥१॥ सूतउवाच अथान्यदपि- ३

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

वक्ष्यामिमाहात्म्यंत्रिपुरद्विषः॥ श्रुतमात्रेणयेनाशु छिद्यंतेसर्वसंशयाः॥१॥ अतःपरत
रंनास्तिकिंचित्पापविशोधनं॥सर्वानंदकरंश्रीमत्सर्वकामार्थसाधनं॥२॥ दीर्घायुर्वि-
जयारोग्यभुक्तिमुक्तिफलप्रदं॥ यदनन्येनभावेनमहेशाराधनंपरं॥३॥ आर्द्राणामपि
शुष्काणामल्पानांमहतामपि॥ एतद्देवाविनिर्दिष्टंप्रायश्चित्तमथोत्तमं॥सर्वकालेप्यभे
द्यानामद्यानांभयकारणं॥ महामुनिर्विनिर्दिष्टैःप्रायश्चित्तैरथोत्तमैः॥५॥ इदमेवपरं-
श्रेयःसर्वशास्त्रविनिश्चितं॥ यद्भक्त्यापरमेशस्यपूजनंपरमोदयं॥६॥ जानताजान-
तावापियेनकेनापिहेतुना॥ यत्किंचिदपिदेवायकृतंकर्मविमुक्तिदं॥७॥ माघेकृष्ण-
चतुर्दश्यामुपवासोतिदुर्लभः॥ तत्रापिदुर्लभंमन्येरात्रौजागरणंनृणां॥८॥ अतीवदु
र्लभंमन्येशिवलिंगस्यदर्शनं॥सुदुर्लभतरंमन्येपूजनंपरमेशितुः॥९॥ भवकोटिश
तोत्पन्नपुण्यराशिविपाकतः॥ लभ्यतेवापुनस्तत्रबिल्वपत्रार्चनंविभोः॥१०॥ वर्षा-
णामयुतंयेनस्नातंगंगासरिज्जले॥सकृद्बिल्वार्चनेनैवतत्फलंलभतेनरः॥११॥-
यानियानितुपुण्यानिलीनानीहयुगेयुगे॥ माघेसितच्चतुर्दश्यांतानितिष्ठंतिकृत्स्न
शः॥१२॥ एतामेवप्रशंसंतिलोकेब्रह्मादयःसुराः॥मुनयश्चवसिष्ठाद्यामाघेऽसि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ब्र·खं·
४

(6)

तच्चतुर्दशीं॥१३॥अत्रोपवासःकेनापिकृतःक्रतुशताधिकः॥रात्रौजागरणंपुण्यं अ·
कल्पकोटितपोधिकं॥१४॥एकेनबिल्वपत्रेणशिवलिंगार्चनंकृतं॥त्रैलोक्यस्यतु २
पुण्यस्यकोवासाहश्यमिछति॥१५॥अत्रानुवर्ण्यतेगाथापुण्यापरमशोभना॥गो
पनीयापिकारुण्याद्गौतमेनप्रकाशिता॥१६॥इक्ष्वाकुवंशजःश्रीमानास्तेपरमधा
र्मिकः॥आसीन्मित्रसहोनामश्रेष्ठःसर्वधनुर्भृतां॥१७॥सराजासकलास्त्रज्ञःशास्त्र
ज्ञःश्रुतिपारगः॥वीरोत्यंतबलोत्साहोनित्योद्योगीदयानिधिः॥१८॥पुण्यानामिव
संघातस्तेजसामिवपंजरः॥आश्चर्याणामिवक्षेत्रंयस्यमूर्त्तिर्विराजते॥१९॥हृद-
यंदययाक्रांतंश्रियाक्रांतंचतद्वपुः॥चरणौयस्यसामंतचूडामणिमरीचिभिः॥२०
॥एकदामृगयाकेलिलोलुपःसमहीपतिः॥विवेशगह्वरंघोरंबलेनमहतावृतः॥
२१॥तत्रविव्याधविशिखैःशार्दूलान्गवयान्मृगान्॥गुरूनव राहान्महिषान्मृगेंद्रा
नपिभूरिशः॥२२॥सरथीमृगयासक्तोगहनदेशितश्चरन्॥कमपिज्वलनाकारं-
निजघाननिशाचरं॥२३॥तस्यानुजःशुचाविष्टोदृष्ट्वादूरेतिरोहितः॥भ्रातरंनिहतं ४
दृष्ट्वाचिंतयामासचेतसा॥२४॥नचैषराजादुर्द्धर्षोदेवानांरक्षसामपि॥छद्मनैवप्रजे

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(6A)

तव्योममशत्रुर्नचान्यथा ॥ २५॥ इतिव्यवसितः पापोराक्षसोमनुजाकृतिः॥आससा
दनृपश्रेष्ठमुत्पातइवमूर्त्तिमान् ॥ २६॥ तंविनम्राकृतिंदृष्ट्वाभृत्यतांकर्त्तुमागतं॥ चक्रे
महानसाध्यक्षमज्ञानात्समहीपतिः॥२७॥अथतस्मिन्वनेराजाकिंचित्कालंविहृत्य
सः॥निवृत्तोमृगयांहित्वास्वपुरींपुनरागयौ॥२८॥ तस्यराजेंद्रमुख्यस्यमदयंती-
तिनामतः॥दमयंतीनलस्येवविदितावल्लभासती ॥२९॥ ततोस्मिन्समयेराजानि
मंत्र्यमुनिपुंगवं॥ वसिष्ठंगृहमानिन्येसंप्राप्तेपितृवासरे ॥ ३०॥ रक्षसासूदरूपेणसं
मिश्रितनरामिषं॥ शाकामिषंपुरःक्षिप्तंदृष्ट्वागुरुरथाब्रवीत् ॥ ३१॥ धिग्धिङ्नरा-
मिषंराजंस्त्वयैतच्छद्मकारिणा॥खलेनोपहृतंमेद्यअतोरक्षोभविष्यसि ॥३२॥रक्षःकृ
तमविज्ञायशस्त्वैवंसगुरुस्ततः॥पुनर्विमृश्यतच्छापंचकारद्वादशाब्दिकं॥ ३३॥राजापि
कोपितःप्राहयदिदंमेनचेष्टितं॥नज्ञातंचवृथाशप्तोगुरुंचैवशपाम्यहं॥ ३४॥ इत्यपोंज
लिनादायगुरुंशप्तुंसमुद्यतः॥पतित्वापादयोस्तस्यमदयंतीन्यवारयत् ॥ ३५॥ ततोनि
वृत्तःशापात्तुतस्यावचनगौरवात्॥ तत्त्याजपादयोरंभःपादौकल्मषतांगतौ॥ ३६॥ क-
ल्मषांघ्रिरितिख्यातस्ततःप्रभृतिपार्थिवः॥ बभूवगुरुशापेनराक्षसोवनगोचरः॥३७॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सविभ्रद्राक्षसंरूपं कालांतकयमोपमं॥ चखादविविधान्जंतून्मानुषादीन्वनेचरः॥३८
सकदाचिद्वनेक्वापिरममाणौकिशोरकौ॥अपश्यदंतकाकारोनवोढौमुनिदंपती॥३९॥
राक्षसोमानुषाहारः किशोरंमुनिनंदनं॥ जग्धुंजग्राहशापार्तो व्याघ्रोमृगशिशुंयथा
॥४०॥रक्षोगृहीतंभर्त्तारं दृष्ट्वाभीतायतत्प्रिया॥उवाच करुणंबालाक्रंदतीभृशवेपिता
॥४१॥ भोभोमामाकृथाःपापंसूर्यवंशयशोधर॥मदयंतीपतिस्त्वंहिराजेंद्रोनतुराक्षसः
॥४२॥ नरवादममभर्त्तारंप्राणात्प्रियतमंप्रभो॥आर्त्तानांशरणार्त्तानांत्वमेवहियतो
गतिः॥४३॥पापानामिवसंघातैः किंमेदुःखैर्जडासृभिः॥ देहेनचातिभारेणविनाभ
र्त्रामहात्मना॥४४॥ मलीमसेनपापेनपांचभौतेनकिंसुखं॥ बालोयंवेदविच्छांतस्त
पस्वीबहुशास्त्रवित्॥४५॥अतोस्यप्राणदानेनजगद्रक्षात्वयाकृता॥ कृपांकुरुम-
हाराजबालायांब्राह्मणस्त्रियां॥४६॥अनाथकृपणार्तेषुसघृणाःखलुसाधवः॥-
इत्यमभ्यर्थितःसोपिपुरुषादःसनिर्घृणः॥४७॥ चखादशिरउत्कृत्यविप्रपुत्रंदुराश
यः॥अथसाध्वीकृशादीनाविलप्यभृशदुःखिता॥४८॥आहृत्यभर्त्तुरस्थीनिचित्तां
चक्रेयथोल्बणां॥ भर्त्तारमनुगछंती संविशंतीहुताशनं॥४९॥राजानंराक्षसाकारंश



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

पास्त्रेणजघानतं ॥ रेरेपार्थिवपापात्मंस्त्वयामेभक्षितः पतिः ॥ ५० ॥ अतःपतिव्रताया-
स्त्वंशापंभुंक्ष्वयथोल्बणं ॥ अद्यप्रभृतिनारीषुयदात्वमपिसंगतः ॥ ५१ ॥ तदामृतिस्तवेत्यु-
क्त्वाविवेशज्वलनंसती ॥ अनपत्यःसनिर्विण्णोराज्यभोगेषुपार्थिवः ॥ ५२ ॥ विसृज्यस-
कलांलक्ष्मींययौभूयोपिकाननं ॥ सूर्यवंशप्रतिष्ठित्यैवसिष्ठोमुनिसत्तमः ॥ ५३ ॥ तस्यामु
त्पादयामासमदयंत्यांसुतोत्तमं ॥ विसृष्टराज्योराजापिविचरंत्सकलांमहीं ॥ ५४ ॥ आ-
यांतींपृष्ठतोपश्यत्पिशाचींघोररूपिणीं ॥ साहिमूर्त्तिमतीघोराब्रह्महत्यादुरत्यया ॥-
५५ ॥ यदासौशापविभ्रष्टोमुनिपुत्रमभक्षयत् ॥ तेनात्मकर्मणायांतींब्रह्महत्यांस्वपृष्ठ
तः ॥ ५६ ॥ बुबुधेमुनिवर्याणामुपदेशेनभूपतिः ॥ तस्यानिर्वेदमन्विछन्राजानिर्विण्ण
मानसः ॥ ५७ ॥ नानाक्षेत्राणितीर्थानिचचारबहुवत्सरं ॥ यदासर्वेषुतीर्थेषुस्नात्वा-
पिचमुहुर्मुहुः ॥ ५८ ॥ ननिवृत्ताब्रह्महत्यामिथिलायांययौतदा ॥ बाह्योद्यानगतस्त
स्याश्चिंतयापरयार्दितः ॥ ५९ ॥ ददर्शमुनिमायांतंगौतमंविमलाशयं ॥ हुताशन-
मिवाशेषतपस्विजनसेवितं ॥ ६० ॥ विवस्वंतमिवात्यंतंघनदोषातमोनुदं ॥ शशां-
कमिवनिःशंकमवदातगुणोदयं ॥ ६१ ॥ महेश्वरमिवश्रीमद्द्विजराजकलाधरं ॥

(8)

शांतंशिष्यगणोपेतंतपसामेकभाजनं॥ ६२॥ उपसृत्यसराजेंद्रः प्रणनाममुहुर्मु
हुः॥ गौतमोपिमुनिश्रेष्ठोराजानंरविवंशजं॥ ६३॥ अभिनंद्यमुनिः प्रीत्यासस्मितं
समभाषत॥ गौतमउवाच कच्चित्तेकुशलंराजन्कच्चित्तेपदमव्ययं॥ ६४
॥ कुशालिन्यः प्रजाः कच्चिदवरोधजनोपिवा॥ किमर्थमिहसंप्राप्तोविसृज्यसक
लांश्रियं॥ ६५॥ किंच्चध्यायसिभोराजन्दीर्घमुष्णंचनिःश्वसन्॥ राजोवाच
सर्वेकुशलिनोब्रह्मन्वयंत्वदनुकंपया॥ ६६॥ राज्ञामुत्तमवंश्यानांब्रह्मायत्ताहिसं
पदः॥ किंतुमांबाधतेत्वेषापिशाचीघोररूपिणी॥ ६७॥ अलक्षितासदपरैर्भर्त्सयं-
तीपदेपदे॥ यन्मयाशापदग्धेनकृतमहोदुरत्ययं॥ ६८॥ नशांतिर्जायतेतस्यप्रायश्चि
त्तसहस्रकैः॥ इष्टाश्वविविधायज्ञाः कोशासर्वस्वदक्षिणाः॥ ६९॥ सरित्सरांसिरम्या
तानियानिपूज्यानिभूतले॥ निषेवितानिसर्वाणिक्षेत्राणिभ्रमतामया॥ ७०॥ ज-
प्तान्यखिलमंत्राणिध्याताःसकलदेवताः॥ मयाव्रतानिचीर्णानिपर्णमूलफला-
शिना॥ ७१॥ तानिसर्वाणिकुर्वंतिस्वस्थंमांनकदाचन॥ अद्यमेजन्मसाफल्यंसंप्रा
प्तमिवलक्ष्यते॥ ७२॥ यस्यसंदर्शनादेवममात्मानंदभागभूत्॥ अन्विछंल्लभतेका



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

पिवर्षपूगैर्मनोरथं ॥७३॥ इत्येवंजनवादोपिसंप्राप्तोमयिसत्यतां ॥ आजन्मसंचि
तानांतुपुण्यानामुदयोदये ॥७४॥ यद्भवान्भवभीतानांत्रातानयनगोचरः ॥ क-
स्माद्देशादिहायातोभवान्भवभयापहः ॥७५॥ दूरभ्रमणविश्रांतंशंकेत्वामिह
चागतं ॥ दृष्ट्वाश्चर्यमिवात्यर्थंमुदितोस्मिमुखश्रिया ॥७६॥ आनंदयसिमेन्वेतः
प्रेम्णासंभाषणादिव ॥ अथमेतवपादाब्जंशरणास्यत्कृतैनसः ॥७७॥ शांतिंकुरु
महाभागयेनाहंसुखमाप्नुयां ॥ इतितेनसमादिष्टोगौतमःकरुणानिधिः ॥-
७८॥ समादिदेशघोराणामघानांसाधुनिष्कृतिं ॥ गौतमउवाच साधु-
राजेंद्रधन्योसिमहाघेभ्योभयंत्यज ॥७९॥ शिवेत्रातरिभक्तानांक्वभयंशरणै-
षिणां ॥ शृणुराजन्महाभागक्षेत्रमन्यत्प्रतिष्ठितं ॥८०॥ महापातकसंहारीगो
कर्णाख्यंमनोरमं ॥ तत्रस्थितिर्नपापानांमहद्भ्योमहतामपि ॥८१॥ स्मृतोवा-
शेषपापघ्नोयत्रसंनिहितःशिवः ॥ यथाकैलासशिखरेयथाचांबरमूर्धनि ॥
८२॥ निवासोनिश्चितःशंभोस्तथागोकर्णमंडले ॥ नाग्निनानशशांकेननतारा
ग्रहनायकैः ॥८३॥ तमोनिस्तीर्यतेसम्यग्यथासवितृदर्शनात् ॥ तथैवनेतरै-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्तीर्थैर्नचक्षेत्रैर्मनोरमैः॥८४॥सद्यःपापविशुद्धिःस्याद्यथागोकर्णदर्शनात्॥अपिपाप-
शतंकृत्वाब्रह्महत्यादिमानवः॥८५॥सकृत्प्रविश्यगोकर्णंनबिभेतित्वघात्क्वचित्॥
तत्रसर्वेसहात्मानस्तपसाशांतिमागताः॥८६॥इंद्रोपेंद्रविरिंच्याद्यैःसेव्यतेसिद्धिकां-
(१) क्षिभिः॥तत्रैकेनदिनेनापियत्कृतंव्रतमुत्तमं॥८७॥तदन्यत्राब्दलक्षेणकृतंभवतित-
त्समं॥यत्रेंद्रब्रह्मविष्ण्वादिदेवानांहितकाम्यया॥८८॥महाबलाभिधानेनदेवःसंनि
हितःस्वयं॥घोरेणतपसालब्धंरावणाख्येनरक्षसा॥८९॥तल्लिंगंस्थापयामासगोक
र्णेगणनायकः॥इंद्रोब्रह्मामुकुंदश्चविश्वेदेवामरुद्गणाः॥९०॥आदित्यावसवोद-
स्रौशशांकश्चदिवाकरः॥एतैर्विमानगैःप्रायोदेवास्तेसहपार्षदैः॥९१॥पूर्वद्वारंनिषे
वंतेदेवदेवस्यशूलिनः॥योन्योमृत्युःस्वयंसाक्षाच्चित्रगुप्तश्चपावकः॥९२॥पितृभिः
सहरुद्रैश्चदक्षिणद्वारमाश्रिताः॥वरुणःसरितांनाथोगंगादिसरितांगणैः॥९३॥-
आसेवंतेमहादेवंपश्चिमद्वारमाश्रितः॥तथावायुःकुबेरश्चदेवेशीभद्रकर्णिका॥-
९४॥मातृभिश्चंडिकाद्याभिरुत्तरद्वारमाश्रिताः॥विश्वावसुश्चित्ररथश्चित्रसेनो- ७
महाबलः॥९५॥सहगंधर्ववर्गैश्चपूजयंतिमहाबलं॥रंभाघृताचीमेनाचपूर्वचित्ति

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्तिलोत्तमा ॥९६॥ नृत्यंतिपुरतः शंभोरुर्वश्याद्याः सुरस्त्रियः ॥ वसिष्ठः कश्यपः क-
ण्वोविश्वामित्रोमहातपाः ॥९७॥ जैमिनिश्चभरद्वाजोजाबालिः क्रतुरंगिराः ॥ एतेव-
यंचराजेंद्रसर्वेब्रह्मर्षयोमलाः ॥९८॥ देवंमहाबलंभक्त्यासमंतात्पर्युपास्महे ॥ म-
(9A) रीचिनासहात्रिश्चदक्षाद्याश्चमुनीश्वराः ॥९९॥ सनकाद्यामहात्मानउपविष्टाउपा
सते ॥ तथैवमुनयः साध्या अजिनांबरधारिणः ॥१००॥ दंडिनोव्रतमुंडाश्चस्नातका
ब्रह्मचारिणः ॥ त्वगस्थिमात्रावयवास्तपसादग्धकिल्बिषाः ॥१०१॥ सेवंतेपरयाभ
क्त्यादेवदेवंपिनाकिनं ॥ तथादेवाः सगंधर्वाः पितरः सिद्धचारणाः ॥१०२॥ विद्या-
धराः किंपुरुषाः किंनरागुह्यकाः खगाः ॥ नानापिशाचावेतालादैतेयाश्चमहाब-
लाः ॥१०३॥ नानाविभवसंपन्नानानाभूषणवाहनाः ॥ विमानैः सूर्यसंकाशैरग्नि-
वर्णैः शशिप्रभैः ॥१०४॥ विद्युत्पुंजनिभैरन्यैः समंतात्परिवारितं ॥ प्रस्तुवंतिप्रगा
यंतिपठंतिप्रणमंतिच ॥१०५॥ प्रनृत्यंतिप्रहृष्यंतिगोकर्णेपृथिवीपते ॥ लभंते-
भीप्सितान्कामान्रमंतेचयथासुखं ॥१०६॥ गोकर्णसदृशंक्षेत्रंनास्तिब्रह्मांड-
गोलके ॥ तत्रघोरंतपस्तप्तमगस्त्येनमहात्मना ॥१०७॥ तथासनत्कुमारेणाप्रयत्न

(१०)

तस्कृतैरपि॥अग्निनादेववर्येणकंदर्पेणचपार्थिव॥१०८॥तथादेव्याभद्रकाल्या
शिशुमारेणधीमता॥दुर्मुखेनफणींद्रेणमणिनागाह्वयेनच॥१०९॥बिभीषणेन
पुण्येनतपस्तक्षमहात्मना॥एतेचान्येचगीर्वाणाःसिद्धदानवमानवाः॥११०॥गो
कर्णेदेवदेवेशंशिवमाराध्यभक्तितः॥स्वनामकानिलिंगानिस्थापयित्वासहस्र
शः॥१११॥लेभिरेपरमांसिद्धिंतथातीर्थानिचक्रिरे॥अत्रस्थानानिसर्वेषांदेवानां
संतिपार्थिव॥११२॥विष्णोश्चदेवदेवस्यब्रह्मणःपरमेष्ठिनः॥कार्तिकेयस्यवी
रस्यगजवक्त्रस्यचाघन॥११३॥धर्मस्यक्षेत्रपालस्यदुर्गायाश्चमहामते॥गोक-
र्णेशिवलिंगानिविद्यंतेकोटिकोटिशः॥११४॥असंख्यातानितीर्थानितिष्ठंतिच
पदेपदे॥बहुनात्रकिमुक्तेनगोकर्णस्थानिपार्थिव॥११५॥सर्वाण्यस्मानिलिंगा
नितीर्थान्यंभांसिसर्वशः॥गोकर्णेशिवलिंगानांतीर्थानामपिभूरिशः॥११६॥
गीयतेमहिमाराजन्पुराणेषुमहर्षिभिः॥गोकर्णेकोटितीर्थंचतीर्थानांमुख्यतां
गतं॥११७॥सर्वेषांशिवलिंगानांसार्वभौमोमहाबलः॥कृतेमहाबलश्वेतस्त्रेता
यामतिलोहितः॥११८॥द्वापारेपीतवर्णश्चकलौश्यामोभविष्यति॥आक्रांतंस



Property of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

म्रपातालंकुर्वन्नपिमहाबलः॥११९॥ प्राप्तेकलियुगेघोरेमृदुतामुपयास्यति॥प-
श्चिमांबुधितीरस्थंगोकर्णक्षेत्रमुत्तमं॥१२०॥ ब्रह्महत्यादिपापानिदहतीतिकिम-
द्भुतं॥ येचात्रब्रह्महंतारोयेचभूतद्रुहःशठाः॥१२१॥ येसर्वगुणहीनाश्चपरदाररता
श्चये॥येदुर्वृत्तादुराचारादुःशीलाःकृपणाश्चये॥१२२॥ लुब्धाःक्रूराःखलामू-
ढास्तेनाश्चैवातिकामिनः॥तेसर्वेप्राप्यगोकर्णंस्नात्वातीर्थजलेषुच॥१२३॥-
देवंमहाबलंदृष्ट्वाप्रयाताःशांकरंपदं॥तत्रपुण्यासुतिथिषुपुण्यर्क्षेपुण्यवास
रे॥१२४॥ येर्च्चयंतिमहेशानंतेरुद्रास्युर्नसंशयः॥यदाकदाचिद्गोकर्णेयोवाको
वापिमानवः॥१२५॥ प्रविश्यपूजयेद्देवंसगच्छेद्ब्रह्मणःपदं॥रवींदुसौम्यवारे
षुयदादर्शोभविष्यति॥१२६॥ तदाजलनिधौस्नानंदानंचपितृतर्पणं॥ शिवपूजा
जपोहोमोव्रतंचर्याद्विजार्च्चनं॥१२७॥ यत्किंचिद्वाकृतंकर्मतदनंतफलप्रदं॥
व्यतीपातादियोगेषुरविसंक्रमणेषुच॥१२८॥ महाप्रदोषवेलासुशिवपूजावि-
मुक्तिदा॥अथैकांतेप्रवक्ष्यामितिथिंपार्थिवमुक्तिदां॥१२९॥ यस्यांकिलमहा
व्याधोलेभेशंभोःपरंपदं॥माघमासेमहापुण्यायासाकृष्णाचतुर्दशी॥१३०॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com